# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम्** – २ (New) | **गुणाः** – ७० |
| **विषयः** – नव्यव्याकरणम् | **कोड**– **CC – 4.1.1** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १५/१२/२०१८ | **सन्दर्भग्रन्थः**– व्याकरणमहाभाष्यम् | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

सर्वादीनि इति शब्दे कीदृशः बहुव्रीहिसमासः विद्यते इति भाष्यानुसारिणीं चर्चां कुरुत ।

अथवा

संज्ञोपसर्जनप्रतिषेधः इति वार्तिकं विवृणुत ।

**प्र–२ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम् ।** १०

उभशब्दस्य सर्वनामत्वे किं प्रयोजनम् ? इति ज्ञापयत ।

अथवा

**न बहुव्रीहौ** इत्यस्य सूत्रस्य भाष्यानुसारिणी व्याख्या कार्या ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

**पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्** इत्येतत् सूत्रं व्याख्येयम् ।

अथवा

**अन्तरं बहिर्योगोपसंव्यानयोः** इति सूत्रं व्याख्येयम् ।

**प्र–४ कस्यापि एकस्य सूत्रस्य भाष्यानुसारिणी व्याख्या विधेया ।** १०

तद्धितश्चासर्वविभक्तिः ।

अथवा

कृन्मेजन्तः ।

**॥ तृतीयान्वितिः ॥**

**प्र–५ कस्यापि एकस्य सूत्रस्य भाष्यानुसारिणी व्याख्या विधेया ।** ०५

एच इग्घ्रस्वादेशे ।

अथवा

आद्यन्तौ टकितौ ।

**प्र-६ कस्यापि एकस्य सूत्रस्य भाष्यानुसारिणी व्याख्या विधेया । १०**

इग्यणः सम्प्रसारणम् ।

अथवा

मिदचोऽन्त्यात् परः ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं सूत्रस्य व्याख्या कार्या । ०५**

उरण् रपरः ।

अथवा

आदेः परस्य ।

**प्र-८ कस्यापि एकस्य सूत्रस्य विस्तृतं व्याख्यानं विधेयम् । १०**

षष्ठी स्थानेयोगा /

अथवा

स्थानेऽन्तरतमः /

**प्र-९ केषामपि दशानाम् एकैकवाक्यैः उत्तराणि लेख्यानि । १०**

१. सर्वनामशब्दे णत्वं कस्मात् न भवति ?
२. सर्वो नाम कश्चित् तस्मै इत्यस्मिन् अर्थे सर्वशब्दस्य चतुर्थ्यन्तं रूपं किम् ?
३. उभ-शब्दस्य कस्मिन् वचने प्रयोगो भवति ?
४. सर्वनाम्नाम् अकच् केन सूत्रेण भवति ?
५. भवत्-शब्दस्य सर्वनामसंज्ञायां कानि प्रयोजनानि ?
६. प्रियविश्व-शब्दस्य चतुर्थी-एकवचनान्तं रूपं किं भवति ?
७. सर्वाद्यन्तस्य बहुव्रीहेः सर्वनामसंज्ञा केन सूत्रेण प्रतिषिध्यते ?
८. गणे पठितानां पूर्वादीनां सूत्रपाठे पुनः पठनस्य किं प्रयोजनम् ?
९. कयोः अर्थयोः स्व-शब्दस्य सर्वनामसंज्ञा प्रतिषिद्धा वर्तते ?
१०.स्वरादीनां का संज्ञा भवति ?
११.तृतीय-शब्दस्य सर्वनामसंज्ञाविकल्पः केषु प्रत्ययेषु परेषु वर्तते ?
१२.अव्ययीभावसमासस्य का संज्ञा भवति ?
१३.षट्सु सूत्रप्रकारेषु स्थानेऽन्तरतमः इति सूत्रं किम्प्रकारकम् ?
१४.अनेकाल्शित्सर्वस्य इत्यत्र शित्करणं कां परिभाषां ज्ञापयति ?
१५.तुह्योस्तातङ्.... इत्यादिसूत्रेण ङित् अपि तातङ् सर्वादेशः कथं भवति ?